শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী উত্তমূর্ ৱীররাঘৱাচার্য অনুগৃহীতা

॥ শ্রী লক্ষ্মীহযৱদন প্রপত্তিঃ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী লক্ষ্মীহযরদন প্রপত্তিঃ ॥

রিশুদ্ধরিজ্ঞানঘনস্বরূপং
রিজ্ঞান রিশ্রাণন বদ্ধদীক্ষম্।
দযানিধিং দেহভৃতাং শরণ্যং
দেরং হযগ্রীরমহং প্রপদ্যে॥ **1** ॥

ব্রহ্মাণমাদৌ র্ব্যদধাদমুষ্মৈ
রেদাংশ্চ যঃ স্ম প্রহিণোতি নিত্যান্।
স্বগোচরজ্ঞান রিধাযিনং তং
দেরং হযগ্রীরমহং প্রপদ্যে॥ **2** ॥

উদ্গীথতারস্বরপূর্রমন্তঃ
প্ররিশ্য পাতালতলাদহার্ষীৎ।
আম্নাযমাকণ্ঠহযো য এতং
দেরং হযগ্রীরমহং প্রপদ্যে॥ **3** ॥

প্রদায পুত্রায পুনঃ শ্রুতীর্যো
জঘান দৈত্যৌ নিযতাব্ধিরাসম্।
হর্য্যশ্চ কর্য্যশ্চ তমর্চ্যমানং
দেরং হযগ্রীরমহং প্রপদ্যে॥ **4** ॥

যন্নাভিনালীকদলস্থনীর
বিন্দূত্থিতৌ তৌ মধুকৈটভাখ্যৌ।
রেদাপহারায তমো রজস্তং
দেরং হযগ্রীরমহং প্রপদ্যে॥ **5** ॥

কাম্যার্চ্যতাং প্রাপ্য ৱরং সুরেষু
গতেষু যজ্ঞাগ্রহরোঽর্থিতো যঃ।
অদর্শযৎ কায হযং ৱপুস্তং
দেৱং হযগ্রীৱমহং প্রপদ্যে॥ **6**॥

যো জাযমানং পুরুষং প্রপশ্যন্
মোক্ষার্থচিন্তাপরমাতনোতি।
ৱিদ্যাধিদেৱং মধুসূদনং তং
দেৱং হযগ্রীৱমহং প্রপদ্যে॥ **7**॥

আদিত্যবিম্বেঽশ্বৱপুর্দধৎ সন্
অযাতযামান্ নিগমান্ অদিক্ষৎ।
যো যাজ্ঞৱল্ক্যায দযানিধিং তং
দেৱং হযগ্রীৱমহং প্রপদ্যে॥ **8**॥

ৱিজ্ঞানদানপ্রথিতা জগত্যাং
ৱ্যাসাদযো ৱাগপি দক্ষিণা সা।
যদ্বীক্ষণাংশাঽহহিতৱৈভৱাস্তং
দেৱং হযগ্রীৱমহং প্রপদ্যে॥ **9**॥

মৎস্যাদিরূপাণি যথা তথৈৱ
নানাৱিধাচার্যৱপূংষি গৃহ্নন্।
ৱেদান্তৱিদ্যাঃ প্রচিনোতি যস্তং
দেৱং হযগ্রীৱমহং প্রপদ্যে॥ **10**॥

শ্রেষ্ঠঃ কৃতজ্ঞঃ সুলভোঽন্বিতানাং
শান্তঃ সুবুদ্ধিঃ প্রথিতো হি ৱাজী।
তদাননাৱিষ্কৃতসদ্গুণৌঘং
দেৱং হযগ্রীৱমহং প্রপদ্যে॥ **11**॥

হস্তৈর্দধানং দরচক্রকোশ -
ব্যাখ্যানমুদ্রাঃ সিতপদ্মপীঠম্।
ৱিদ্যাখ্যলক্ষ্ম্যঞ্চিতৱামভাগং
দেৱং হযগ্রীৱমহং প্রপদ্যে॥ **12**॥

॥ ইতি শ্রী লক্ষ্মীহযৱদন প্রপত্তিঃ সমাপ্তা॥